प्रथमासि केवलयोः गायामं ... रेपालयकेः ॥ द्वितीयं च पंचतायनयो चतुर्थे पंचम गायं ... ॥ ... जनम ... मासं ।
प्रथमाति केवलयोः ... ॥ सप्तमं ... ॥ ... चांद्रिकं च तथा ज्ञेया षोडश श्राद्धानि
सप्तमं श्राद्धमंतयोः ॥ नवम चैतयोः द्वयं एकादशमेनि द्विकस्तथा ॥ ३ ॥ ... अमालक्ष्मी महा ... मासानां मेलये कृत्वा ॥ ...
णीनां ॥ ५ ॥ माता पिता ... व्याप्तिं तस्य तत्कार्य उच्यते ॥
च्यतपत्थ्य ... प्रादेशिय स्याक्षत्ये वर्च ४

अथ प्रेतकल्पपद्धतिः ॥ अथांत्यदशदानानि प्रकाश्यंते । कुशासनं भूपर्यासनादौ
कृत्वा प्रायश्चित्तं कारयेत् ततो व्रतभंगोद्यापनव्रतानां संकल्पं कुर्यात् तत्र सवत्सां
गां संपूज्य अद्येह अमुकशर्म्मणः फलतिलादिभिः गृहीत्वा व्रतानां अकृतोद्यापनजनितफ
लहानिजनितदोषोपशांत्यर्थं तदायुःपरिहारार्थं इमां सवत्सां श्रीवासुप्रीतये ब्राह्मणायतु
भ्यं संप्रददे इति दत्वा सर्वप्रायश्चित्तं कुर्यात् अद्येह अमुकशर्म्मणः जन्मप्रभृत्यापर्यंतं ज्ञाता
ज्ञात कामाकाम सकृदसकृत्कायिक वाचिक मानसिक सांसर्गि अस्पृश्य स्पर्शन अभोज्य
भोजन अपेयपान अश्राव्य श्रवण जनित शकल पातकातिपातकोपपातक लघुपातकि
संकरीकरण मलिनीकरण अपात्रीकरण जातिभ्रंशकरण प्रकीर्णपातकानां क्षयार्थं प्राणांका
नि समये शुद्धिद्वारा श्रीवासुदेवप्रीत्यर्थं प्राजापत्यादि प्रायश्चित्त प्रत्याम्नायीभूतद्रव्यं इमां गां
सवत्सां यथाशक्त्यालंकृतां रुद्रदेवत्यां अमुकशर्मणे ब्राह्मणाय तुभ्यं संप्रददे दानवाक्य
यज्ञसाधनभूतासि विश्वस्याघप्रणाशिनि विश्वरूपधरा देवी प्रीयतामनया गवा ॥ दान
प्रतिष्ठां कृत्वा कृतैतद्गोदानप्रतिष्ठासिद्ध्यर्थं दानप्रतिष्ठां च इदं सुवर्णं अग्निदैवत्यं

प्र
१

ब्राह्मणाय तुभ्यमहं संप्रददे यश्चयस्मृत्वेतिपठित्वा तदशक्तो यथाशक्ति सुवर्णादिना सर्वथा
यश्चित्तं कुर्यात् अवश्यमेव पुत्रादिकर्त्ताचेदनेन स्थाने ऽस्याऽमुकशर्मण इति वदेत् तस्मि
न्दिने उपवासः कर्त्तव्यः अशक्तो हविष्याशनं शक्तश्चेद्दशदानानि कुर्यात् दानविधि
गोभू तिलहिरण्याज्यं वासोधान्यगुडानि च रौप्यं लवणमित्याहुर्दशदानानि पण्डिताः
संकल्पः पूर्ववत् अद्येह अमुकोऽहं गोभूतिलहिरण्याज्य वासोधान्य गुडरौप्यलवणा
नित्यादीनां सांगफलप्राप्त्यर्थं ब्राह्मणाय दास्ये तत्तत् दानवाक्य गवामंगेषु तिष्ठन्ति भुव
नानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च गोदद्यात् भूमिशार्घ्य सर्वभूता
श्रया भूमिर्वराहेण समुद्धृता अनन्तसस्यफलदा मतः शांतिं प्रयच्छ मे तिलवाक्यं मह
र्षिगोत्रसंभूता कश्यपस्यमुद्भूताः तस्मादेषां प्रदानेन मम शान्ति व्यपोहति हिरण्यवा
क्यं हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः अनन्तपुण्यफलदा मतः शांतिं प्रयच्छ मे आ
ज्यं कामधेनुसमुद्भूतं देवानामुत्तमं हविः देवानामाज्यहारं मतः शान्तिं प्रयच्छ मे वस्त्रं रामः॥
शरणं सर्वलोकानां लज्जालक्षणमुत्तमं सर्वेषु धारि वस्त्राहं मतः शान्तिं प्रयच्छ मे धा १

न्यं सर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत् प्राणिनां पायतेचैव मतः शांतिं प्रयच्छ मे गुड य
थो देवेषु विश्वात्मा प्रवरश्च जनार्द्दनः स्यामवेदस्तु वेदानां महादेवस्तु योगिनां प्रणवः सर्व
मंत्राणां नारीणां पार्वती तथा तथा रसानां प्रवरः सर्वदेवे रसोत्तमः मम तस्मात्परां लक्ष्मीं ददस्व त्व
४ रायो गुड सर्वदा अथ रोप्य शांतिर्यातस्य पितॄणां विष्णुशंकरयोः सदा शिवनेत्रोद्भवं रोप्यं मतः शांति
प्रयच्छ मे लवण यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना शंभोः प्रीतिकरं नित्यं मतः शां
तिं प्रयच्छ मे कर्पास कर्पासदानात्सित्तवान्तस्य सुचारण लयाद्गुणाः परः तस्मात्कर्पासदा
नेन वासुदेवः प्रसीदतु इति पुत्रादयहितार्थाय ऋणाधेन्वादिदानं कुर्य्यात् ततो ऋणगोस
ङ्कल्प अथेह अमुकशर्मणो मम ज्ञाताज्ञात कामाकामकृत्याकृत्य सकल देवपितृमनुष्या
णां ऋण परिहारार्थं इमां सुपूजितां धेनुं अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दान
वाक्यं नारायणध्यानं ऐहिकामुष्मिकं चैव सप्तजन्मार्जितं ऋणं तत्सर्वं क्षम्यतां यातिगो
मेकां ददतो मम देवपितृमनुष्याणां ज्ञाताज्ञात ऋणं मया कृतजन्मार्यया शुद्धा सुरभिन्दि
शचित्ते अथेह अमुकोहं दानप्रतिष्ठात्वेन इदं सुवर्णमग्निदेवत्यं ब्राह्मणाय तुभ्यमहं

श्रे
२

संप्रददे ऐहिकामुष्मिकं चैव सप्तजन्मार्जितऋणा तत्सर्वं क्षयतां याति गामेकां ददतो
मम: देवपितृमनुष्याणां ज्ञाताज्ञातऋणा मया कृतजन्मारभ्यामुद्धा ऋणविमुक्ति दक्षाचिंते
अद्येह अमुकोहं दानवत्त्वेन इदं सुवर्णं अग्निदैवत्यं ब्राह्मणाय तुभ्यमहं संप्रददे यस्यस्मृ
त्येतिपठित्वा पापधेनु दद्यात् पूर्ववद्ब्राह्मणाचसंपूज्य संकल्प अद्येह मम जन्मप्र
भृत्या जन्मपर्यंतं ज्ञाताज्ञात कामाकाम सकृद्वसकृन्मनोवाक्कायजनित सकलपापक्षया
र्थं इमां श्वेतां गां सुपूजितां अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दानवाक्यं ज्ञाता
ज्ञातं च यत्पापं मनोवाक्कायकर्मभि तत्सर्वं विलयं यांतु गोविंदस्य प्रसादतः दानप्रति
ष्ठा अद्येह कृतैतद्दानप्रतिष्ठासिद्ध्यर्थं प्रतिष्ठात्वेन इदं सुवर्णं अग्निदैवतं ब्राह्मणाय
तुभ्यमहं संप्रददे यस्यस्मृत्येतिपठित्वा अथ मोक्षधेनुदानं दद्यात् अद्येह अमुकश
र्मणः श्रीजगन्नाथप्रीतये अमुकं दस्य प्रसादात् सायुज्यादिमुक्तिकामः इमां कपिलां धेनुं मोक्ष
धेनु प्रात्रयः अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे दानप्रतिष्ठा अद्येह अमुकोहं क रामः॥

कपिलादानप्रतिष्ठासिद्ध्यर्थं दानप्रतिष्ठात्वेन इदं सुवर्णं ब्राह्मणाय दास्ये दानवाक्यं
मोक्षं देहि हृषीकेश मोक्षं देहि जगत्पते मोक्षधेनुप्रदानेन मुकुंद प्रियतां मम: अथ
वैतरणीदानं अद्येह ऽमुकोहं ऽमुकशर्म्मणः सुखेन यमद्वारे वैतरण्यां स्वयनधोत्ता
रणाय गोदानं करिष्ये कृष्णां गां ब्राह्मणं च संपूज्य धेनुं प्रार्थयेत् धेनुके त्वं प्रतीक्षस्व
यमद्वारे महाभये उत्तितीर्षुरहं देवि वैतरण्यै नमोस्तुते ब्राह्मणं प्रार्थयेत् विष्णुरूप
द्विजश्रेष्ठ भूदेव पंक्तिपावनः तर्त्तुं वैतरणीं नद्यां गामेनां प्रददाम्यहं अद्येह अमुकोहं
ऽमुकशर्म्मणः वैतरणीनदी दुस्तारणात्सु तरणाय इमां कृष्णां गां कृष्णवस्त्रावृतां कृष्णमा
ल्यालंकृतां सवत्सां रुद्रदेवत्यां ऽमुकशर्म्मणे ब्राह्मणाय तुभ्यमहं प्रददे दानवाक्यं
यमद्वारे महाघोरे या सा वैतरणी नदी तर्त्तुकामः प्रयच्छामि तुभ्यं कृष्णां वैतरणीं तु गां यासौ वै
तरणी प्रोक्ता पूयशोणितवाहिनी तेनुनात्तर्त्तुकामस्त्वं कृष्णां गां प्रददाम्यहं गोपुच्छं
ब्राह्मणो हस्ते दद्यात् दानप्रतिष्ठा अद्येह ऽमुकोहं कृतैतत्कृत दानप्रतिष्ठासिद्ध्यर्थं दानप्र
तिष्ठात्वेन इदं सुवर्णं ब्राह्मणाय दास्ये यस्य स्मृत्वेति पठेत् स्त्रियाः ऽमुकी देव्या इति

प्रे.
२.

सर्वत्रसंकल्पंकुर्य्यात् ॥ प्रेतंस्नापयेत् तत्रमंत्र ॥ गयादीनिचतीर्थानियेचपुण्या
शिलोच्चया कुरुक्षेत्रंचगंगाचयमुनाचसरस्वति कौशिकीचंद्रभागाचसर्वपापप्र
णाशिनि नंदाभद्राचकाशीचगंडकीसरजूतथा भैरवंचवराहंच तीर्थंपुंडरकंस्त
था पृथिव्यांयानितीर्थानि चत्वारःसागरःस्तथाः वैतरण्यविशुद्धार्थं तस्मिन्नायो
विशंतुमे शुभ्रवस्त्रयज्ञोपवीत गोपिचंदनोद्दीप्त सर्वांगपुष्पमालाविभूषितंकृ
त्वा तस्यमुखेसप्तसुछिद्रेषु हिरण्यसकलानिनिक्षिपेत् तत्रवस्थानेपिंडंदद्या
त् ॥ अद्येह ऽमुकगोत्रस्या ऽमुकप्रेतस्य वासुदेवत्ता प्रथमपिंडस्थानेपिंडप्रदानम
हंकरिष्ये ॥ अद्येह ऽमुकगोत्र ऽमुकप्रेतस्यपिंडासनंतवोपतिष्ठतां ॥ अद्येह ऽमुकगो
त्र ऽमुकप्रेत अवनेजनंतवोपतिष्ठतां ॥ अद्येह ऽमुकगोत्र ऽमुकप्रेतस्थानपिंडो
मदत्तस्तवोपतिष्ठतां ॥ अद्येह ऽमुकगोत्र ऽमुकप्रेत प्रत्यवनेजनंतवोपतिष्ठतां
इतिस्थानेपिंडंदद्यात् ॥ गृहस्थंब्राह्मणंपश्चिमाशिरःसाक्षात्रिया मुत्तरेणवैश्यं
पूर्वेणशूद्रं दक्षिणेनश्मशानंनयेत् ॥ ॐ अहरहर्णयजमानो गामश्वपुरुषं

राम ॥
२

पश्र्चं वैवश्वतोन तृप्यंतिसुरयाश्च दुर्मति ॐ अपेत्तु मृत्तुरमृत्तंमउ आगांद्व
वस्वतो नाभयंकृणोत्तु इत्यादियशक्तपठेत् ॥ ततोयमद्वारपिंडं दद्यात् पंथि
विश्रामपिंडंदद्यात् अद्येह अमुकगोत्रस्य अमुकप्रेतस्य पंथी विश्रामपिंडदान
महंकरिष्ये अमुकगोत्रस्य अमुकप्रेतस्य पिंडासन तवोपतिष्टतां अमुकगोत्र अमु
कप्रेत गत्य पनेजनं तवोपत्तिष्टतां ॥ ततः श्मशानभूमिमासाद्य भूमिमोक्ष
णादिकुर्य्यात् ततोब्राह्मणादिभियसीज्ञीयकाष्टानि आनयेत् अगरचंदन
श्रीखंडादि देवदारु तुलसी बिल्वपलाशादि अन्यानिपद्मादीन वानयेत्
त् अथशुचिमरणोरकं चिलिखते कर्त्तादेशकालौ स्मृत्वा पित्रादिमरणस
येर्द्धा ल्कोद्याधरी शिवाभयाच्छिष्टा स्पृश्यद्य मरणावधन करणादिजनित्तप्र
त्यवायपरिहारार्थं श्रीवासुदेवप्रीतयेक्षादिप्रायश्चित्त प्रत्यम्नायिभूत्तं गवादि द
व्यंसुवर्णब्राह्मणायदास्ये सूतकंतव्यादद्यात् कर्त्ता पुत्रादि अधिकारप्रात्य
र्थं किंचित्प्रायश्चित्तप्रत्याभूत्तं गवादिद्रव्यं ब्राह्मणायदास्ये क्रियांतकुर्त्तय

सु. तदह्नस्तस्य मुंडनं शेषाः पुत्रा दशाहे तु केशश्मश्रुनखानि च मात्रापित्रामृ
तौवापि पवनं न कृतं सुतैः नोपतिष्ठति तत्सर्वं दत्तं तोयं तिलादिकं तस्मात्सर्वप्रय
त्नेन तद्दिने मुंडनं शिरः पुत्र पत्नि तथा भ्राता दौहित्रः पौत्रकस्तथा यः करोत्यौ
र्ध्वदैहिकं सोपि तत्रैव मुंडयेत् मृतिस्थानेति अद्येहेत्यादि अमुकगोत्रस्या अमु
कप्रेतस्योर्ध्वदैहिकं करिष्ये तदंगत्वेन स्थानपिंडमारभ्य चितापिंडपर्यंतं तमोर्ध्वदै
हिकं कर्माधिकारसिद्ध्यै स्नानं करिष्ये ततो अमुकगोत्रस्यामुकप्रेतस्य स्थानपिं
डप्रदानं करिष्ये अमुकगोत्रस्या अमुकप्रेतस्या आसने तवोपतिष्ठतां अमुकगो
त्रस्यामुकप्रेतस्या वनेजनं तवोपतिष्ठतां स्थानपिंड पूर्वं द्वारपिंड पथिविश्रामपिंडं ततः
श्मशानभूमिमासाद्य दर्भं वित्वा भूमौ प्रेतं निधाय पुत्रादिकर्त्ता स्नात्वा अद्येह अमुक
गोत्र अमुकप्रेतत्व मोक्षार्थं ऊर्ध्वदैहिकं मह करिष्ये आस्थानि च पूरहितायां भूमौ अप
२ह सर्पंति ये प्रेताये केचिद् इह पूर्वजा इति भूमि प्रार्थ्य तत्र शुचिभूमौ आग्रे पाषाणमेकं
निधाय तस्मिन्दक्षिणायां कुशानास्तीर्य अगर चंदन देवदारु विल्व तुलसी फला राम:॥

तकस्यचस्तके द्वितीयेपतितेचादौमृतकस्यशुद्धकारिष्यते १ शुद्धाविप्रादशाहेनद्वाद
शाहेनक्षत्रिया वैश्यःपंचदशाहेन शूद्रो मासेनशुद्ध्यति शंखारेक्लेशदग्धस्य कृताना
नकेशवः प्रसीदस्तु मुखानाय ज्ञानदृष्टिगमोभवः यादृशं पुस्तकं दृष्ट्वा तादृशं लिखि
तंमया। यदिशुद्धमशुद्धंवा ममदोषोनदीयते। संवत् १९४२ मीनार्कगताशार ५ भौम॰
तिष्ठंति सर्वपापानिशरीरेचास्यदक्षिणः कुक्षिपिण्डःप्रदातोहितेषामेवोपतिष्ठतां ततः चि
ताग्रेपायाशापरिसंस्थाप्य तुन्नोऽग्ने इहागच्छ इहातिष्ठतु ऽग्निंसंपूज्यगंधाक्षतपुष्पैः
ततोऽग्नेप्रार्थनांकृत्वा मंत्रेणानेननिश्चितं स्वाहाक्लेशनिर्विघ्नसप्तजिह्वोहुताशनः सत्व
मार्गप्रदानेनयमापत्युरतीतकं इत्यग्निप्रार्थ्यः संस्कृत्यप्रतिष्ठाप्य संपूज्याज्येनाग्नौजुहु
यात् अथमंत्रः॥ ॐ अग्नितेजाधिपतयेस्वाहा १ विश्वेवसत्वाधिपतयेस्वाहा २ ॐकालाय
धर्माधिपतयेस्वाहा ३ ॐपृथिव्यैलोकाधिष्ठात्र्यैस्वाहा ४ ॐमह्योरसाधिष्ठात्रिभ्यःस्वाहा
५ ॐवायवेबलाधिपतयेस्वाहा ६ ॐ आकाशायसर्वाधिपतयेस्वाहा ७ ॐकालाधर्माधिष्ठात्र्यै
स्वाहा ८ ॐमह्यःसर्वासाक्षिणीभ्यःस्वाहा ९ ॐब्रह्मणेवेदाधिपतयेस्वाहा १० रुद्रायश्म

नाधिपतये स्वाहा ११ इत्येकादशाहुतिं हुत्वा प्रथमं गंधपुष्पाद्यैः क्रव्यादं संपूज्य ततः
प्रार्थना त्वं भूतकृज्जगद्योनिस्त्वं लोकपरिपालकः १ उपसंहारकस्तस्मादेनं स्वर्गं मृतं नय
इति क्रव्यादमध्यर्च्य शरीराहुतिं माचरेत् अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः असौ
स्वर्गाय लोकाय स्वाहा ज्वलति पावक १ यमाय स्वाहा २ अन्तकाय स्वाहा ३ मृत्यवे स्वाहा ४
ब्रह्मणे स्वाहा ५ कालिकाभ्यो देवीभ्यः स्वाहा ६ ॐ द्यावाभूमिभ्यां स्वाहा ७ ततो अष्टौ
घृताहुतिः ब्रह्महत्यायै स्वाहा १ विश्वेभ्यो देवेभ्यः स्वाहा २ द्यावापृथिवीभ्यां स्वाहा ३ अ
यं लब्धमंत्रः॥ पूर्वोक्ततीर्थानि ध्यात्वा देवाश्चाग्निमुखाः सर्वे हुतं स्नानं गतायुषं देहं पुंचा
स्य गात्राणि देहं तु गतिमुत्तमं अग्निदानपुत्रादिको पसव्यं कृत्वा होमाग्निं सर्वं ध्रुवमुल्मुकं गृ
हीत्वा मंत्रमेव पठेत् कृत्वा दुष्करं कर्म जानता वापि जानता मृत्युकालवशं प्राप्त नरः पंचत्वमा
गतं १ धर्माधर्मसमायुक्तं लोभमोहसमावृतं दहेयं सर्वगात्राणि दिव्यां लोकान्स गच्छतु॥ इ
ति मंत्रं शीघ्रमुच्चार्य विप्रदक्षिणां चितायां कृत्वा होमाग्निं सर्वं ध्रुवमुल्मुकं पुरुषस्य शिरोदेशे दानं
स्त्रियाः पादोदेशोल्मुकं देयं दह्यमानशवस्य कंपनं हवनं छेदनं कर्तव्यं कुतः यतो मा दुःखं

रामः

ततः कुक्षिपिंडं दद्यात् २ उपक्ष्यात् ३

शमस्त्वापत्तिर्यं कर्मे शुद्धाद्य नाहन्ते दक्षिणोत्तरस्य: ईतिमंत्रेण प्रेतं उत्तानं दक्षिणा शिरस्क
निदध्यात् पूर्ववत् ततः प्रेतमरणादिकोष्ठैराछादयेत् ततः कर्यादो समग्रपरित्यज्य
प्रसः शिरःप्रदेशे स्त्रियाः पादप्रदेशेऽपसव्येन हुताशनमादाय: ॐ कृत्वा तु दुष्कृ
तं कर्म्म जानता वाप्यजानता मृत्युकालवशं प्राप्तं मनपत्यंमागतंच धर्म्माधर्मसमायुक्तं
लोभमोहसमावृत्त आदहेत्सर्वगात्राणि दिव्यांल्लोकान्स गच्छतु एवमुक्त्वा ततः शिघ्र
हत्वा चैव प्रदक्षिणा ज्वालामानं तथा वन्हि यथानं च प्रदीयेत इति सप्त प्रदक्षिणा कृ
त्य ततो दह्यमाने प्रेतोपरि तिलान् विकिरेत् कव्यादाय नमः इति मंत्रेण चितोपरि स
प्त प्रदक्षिणा कुर्वन्त् सप्त समिध प्रक्षिप्य तदुल्मोपरि सप्त कुठार प्रहारकान्दत्वा त
तो यथास्थानादस्थि निनिकास्य कपोतावशेषं देहं ज्ञात्वा निष्काश्य क्षालयित्वा
वस्त्रेण परिवेष्ट्य आगधजलप्रक्षिपेत् अथास्थिसंचयनं तद्यथा सन्निहित या
खभूमौ अद्येह अमुक गोत्रस्यामुक प्रेतस्यास्थीसंचयन स्वाद्य आसनं तवोपति
ष्ठतां ऽमुकं प्रेतामुक गोत्र अवनेजनं तवोपतिष्ठतां अद्येहाऽमुकगोत्राऽमुक प्रे
त एव आमपिंडो महत्तवोपतिष्ठतां अद्येहाऽमुक गोत्रऽमुकप्रेतप्रत्यवनेजनंत

वोपतिष्ठतां एतत्तेशीतलोदकमुपतिष्ठतां अयंतेगंध एत्यक्षतां पवित्राणिसूत्राणि
एषआमवलिधूपदीपंत्वोपतिष्ठतां इतिदत्त्वाविसृज्य अन्नपानपक्वान्नभक्ष्यभो
ज्यपायसपाकदेशकालोद्भवफलमूलगंधमाल्याधूपदीपादिनि मृन्मयेषुभांडकुके
चिद्देशाचारात्स्थापितान्यादाय ॐनमः क्रव्यादमुखेभ्योदेवेभ्यो इतिमंत्रेणत्वरा
न्वितःप्राचिनावितिभीः केचिद्दग्धेकेचित्तूष्णं इतिप्रकारेणश्मशानदेवताःपूज्याः
ततःसर्वज्ञातिभिनमः क्रव्यादमुखेभ्योदेवेभ्य इति क्रव्यादमुखाल्लिखित्वा येस्मि
न्श्मशानेदेवाःस्युभवतश्चसनातनाः तस्मात्सकाशद्गृंतुवलिमष्टगमक्षयं प्रेत
स्यास्यशुभान्लोकान्प्रयच्छंत्यपिशाश्वतीत अस्माकमायुरारोग्यंसुखंचददतां
श्रियं इतिमृद्भांडंसंस्थाप्य:भक्ष्यभोज्यवलिंदत्त्वविसर्जयेत ततोयज्ञीयवृक्षोद्भव
शाखाबाहुमात्रामादायत्त याज्ञियनिपरिवर्त्यापसव्येन क्रमोद्भवंदत्त्वामृतस्या
शिरोवस्त्रवक्षःपाणिनाभिपार्श्वपादेष्वेतानि दक्षिणहस्तकनिष्ठांगुष्ठाभ्यांउद्धृत्य
पंचगव्येनस्नापयित्वा कुंकुमादिनाउलिप्यसर्वौषधीभिश्चकृत्वा दक्षिणोत्तरा
यतां कुशुरूवजूर्याकुशानास्तीर्य्य ॐनमः सावाचा अज्येनआस्तरणाविपया पृथिव्या

मस्ततः यापाशुं रसेन निर्वयाम्यसौक्षोमवस्त्रेणावेष्ट्यानव आच्छादने मृन्मयभांडे
निक्षिप्यः तद्भांडे मस्तरामेवृक्षमूले वाशुचौदेशे संस्थापयेत् ततः श्चिताभस्मागारा
घान्नीतोया विनिक्षिपेत् ततो श्चितास्थलं वहुदकेन शुसंशोध्य गोमयेनालिप्यः त
त्रोदीपं प्रज्वाल्य चित्तापिंडंदद्यात् अद्येहा ऽमुकगोत्रस्या ऽमुकप्रेतस्य चित्तापिंडं अद्य
न महं करिष्ये अद्येहा ऽमुकगोत्र ऽमुकप्रेता प्रत्यवनेजने तवोपतिष्ठतां इति संचय
नवहुधापुष्पचैर्नामः क्रव्याद मुखेभ्यो देवेभ्यः इत्यादिभिः श्मशानदेवता पूजयेत्
तत्स्थलं गोक्षीरेणाभ्युक्ष विसर्जयेत् ततः श्चितास्थालम प्रदक्षिणामाकृत्यानिरी
क्ष्यमाणा अन्यूजलं ममिसमित्तं गच्छेयु तत्रपवनं कारयित्वा अकृतमुंडनस्योदक
दानादिवैयर्थ्यश्रवणात् पिंडदानात् प्रागवश्यमुंडनं कुर्य्यात् इतरे प्रथमदिने अस
भवेत् चिरात्रावपि भवतीत्याहुः गंचौचे मुंडनं न कुर्य्यात् प्रातः कार्य्यं प्रसंगाद स्थिप्र
क्षेपो विधियम् महापुन्यं नद्यां श्रवणात् यथा दशाहाभ्यांतरे ऽस्थिप्रक्षेपे गंगा भवति त
या तत असंभवे कालांतरेपि पुत्रादिगंगा गत्वा स्नात्वा पंचगव्येन स्थीनी सि
क्त्वा हिरण्यमध्वाज्य तिलामिश्रितानि मृत्पिंडसंपुटे निधाया दक्षिणादिशां पश्य

१ नमोस्तु धर्मराजायेति जलं प्रक्षिप्य क्षिप्रं गंगांभसि क्षिपेत् जलादुत्तीर्य सूर्यमुदीक्ष्य
विप्रमुखान्यथाशक्ति दक्षिणां दत्वा गंगातोयेषु यस्यास्थि दशाहाभ्यंतरे प्लवंत न त
स्यापुनरावृत्ति ब्रह्मलोकात्कदाचनेति नियमस्मरणात् तत्र दीपदानसंकल्पः अद्ये
हऽमुकगोत्रस्यऽमुकप्रेतस्य प्रलोकांधकारनिवृत्त्यर्थं अद्यावधि दशदिनपर्यंत
तैलाज्यखंडदीपामदत्तस्तवापतिष्ठंता अथ प्रत्युत्थामभिधीयते वहतिशुद्धवापस
मीपंगत्वा अपसव्येन सचेलं स्नात्वा पाणिपादौ प्रक्षाल्याचम्यऽपसव्यं विधाय मु
क्ताशिखो भूत्वा दक्षिणाभिमुखं निमज्जनं सव्यं कृत्वा आचम्याऽपसव्येन मुक्त
शिखो दक्षिणाभिमुखो भूत्वा स्नानसंकल्पः अद्येहऽमुकगोत्रस्याऽमुकप्रेत
स्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये प्रथमदिनसंबंधिना प्रथमदिनानिमित्ता
य एककपिंडदानार्थं स्नानं करिष्ये स्नात्वाचम्याऽपसव्येन दक्षिणादिशि पाषा
णोपरि एकं शिखं पवित्रं स्थापयेत् तस्योपरि दशदिनपर्यंत दिनवृद्ध्या तिलतो
यकुशांजलिं दद्यात् अंजलिं गृहीत्वा अद्येहऽमुकप्रेतस्य प्रेतत्वविमुक्तये उत्तम
लोकप्राप्तये प्रथमनिमित्ताय चित्तादाहजनिततृषोपशमनाय एष तिलतोयांज

प्रथम दिने रौरव नाम नरकोत्तारणाय मूर्द्धावयवस्तं भूत्वा पुर: । द्वितीये दिने योनि कुंभव नाम नरकोत्तारणाय चक्षु श्रोत्र नासास्तं भूत्वै

तृतीये दिने महारौरव नाम नरकोत्तारणाय भुज ग्रीव वक्षस्तं भूत्वा पुर: । चतुर्थे दिने तामिस्त्र नाम नरकोत्तारणाय उदर नाभि लिंग गुदा मे

पंचम दिने ऽधंतामिस्त्र नाम नरकोत्तारणाय पृष्ठ हृदजानु जंघा चरणा वयव । षष्ठम दिने संभ्रम नाम नरकोत्तारणाय निखिलांग सत्वांग मर्मावयव संभूत्वै

सप्तम दिने मेध्यकृमि नाम नरकोत्तारणाय सर्वगात्रावयव संभूत्यै पुरक । अष्टम दिने ऽसिपत्र(?) नाम नरकोत्तारणाय नखरोम समूत्यै पुरकपिंड

त्तिमद्दत्तस्तवोपतिष्ठतां तथान्यदिवसे प्रथमदिनसंबंधिऽमुकदिननिमित्ताय येष
तिलतोयांजलीर्मद्दत्तस्तवोपतिष्ठतां अथ दशदिनपर्यंतं पुत्रश्चेदंजलिदत्वा स
व्यनाचम्य स्नात्वा कर्मस्थालमागत्वा दक्षिणाभिमुखवेदानिर्माय तत्रस्थालसा
निध्यं पाकार्थं चुल्लिविधाय पाकंकृत्वा दीपप्रज्वाल्यः अपसव्येन संकल्प्यः अद्ये
हाऽमुकगोत्रस्याऽमुकप्रेतस्या प्रेतत्वविमुक्तये उत्तमुल्लोकवाप्तये प्रथमदिनसंबंधि
प्रथमदिननिमित्ताय प्रथमदिने रोरवनामनरकोत्तारणाय मूर्द्धवयमे भूत्वा पुरकपिं
डप्रदानं करिष्ये तूष्णी वामभागे कर्मपात्रं संस्थाप्य तदुपरि एकशिखं पवित्रं तिलं
गंधक्षतान्निःक्षिप्य वेद्युपरि एककुशासनं संकल्प्यः अद्येहाऽमुकगोत्रस्याऽमुकप्रेत
स्यापिंडाशनं त्तवोपतिष्ठतां अद्येहाऽमुकगोत्रस्याऽमुकप्रेतऽवनेजनं तवोपतिष्ठतां पिं
डदानं आद्येहाऽमुकगोत्राऽमुकप्रेतस्य रोरवनामनरकोत्तारणाय मूर्द्धावयवसंभूत्वा
एषपुरकपिंडामद्दत्तस्तवोपतिष्ठतां अद्येहाऽमुकगोत्राऽमुकप्रेत प्रत्यवनेजनं तवो
पतिष्ठतां अयंतशीतलोदकमुपतिष्ठतां अयंते गंध एत्यक्षता भृंगराजपत्राणि उप
तिष्ठतां अयंते धूपदीप एतानि ऊर्णासूत्राणि मध्यन्लवलिस्तवोपतिष्ठतां धूपदीपौ

प्रे.मं.
७

अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्या एतत्तेशीतलोदकं गंधाक्षतपुष्पधूपदीपोर्णास्त्र
मधन्नवलिस्तवोपतिष्ठतां ततः स्तिलकुशतोयपात्रं दर्भयुतं पिंडोपरि दद्यात् अ
द्येहाऽमुकगोत्रस्याऽमुकप्रेतस्या चित्तादंजनित तृषोपशमाय प्रथमदिनसंबंधिप्र
थमदिननिमित्ताय एकतिलकुशतोयपात्रं मद्दत्तं तवोपतिष्ट तिलतोयपात्राणि दिन
वृद्धिदेयानि सर्व्वेकृत्वा कम्मपात्रं उत्थाय पिंडोपरि भ्रामयित्वा तत्रमंत्र अनादि
निधनोदेव शंखचक्रगदाधर अव्ययपुंडरीकाक्ष प्रेतमुक्तिवरदोभवः इतिभ्रामयि
त्वा अपसव्येन पिंडपशु निक्षिपेत् जलाश्रयेक्षित्वा दंतधावनसहितं नीरक्षीरस
हितं वानलपात्रं निधाय चितानलपात्रोपरिनिषेत् तत्र मंत्र चितानलप्रदग्धासि
परित्यक्तासि बांधवै इदंनीर मिदंक्षीर मतस्नाही इदंपिव प्यात्तियावदाकाशेपिंड
वाय्यमइशिया तावत्व मसुखेतिष्ठ्ये दं तोयपुनिक्षिपेत् इतिक्षित्वा सव्येनस्ना
त्वा शुभ्रवस्त्रोत्तरीयेणपरिधाय स्वगृहमागच्छेत् एकभक्ताशन हविष्याशनकु
र्य्यात् अतिदशादिनपर्य्यंतमेवविधानेनकृत्वा द्वितीयेदिनेयोनिपुंसवनामनरको राम:
७

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्र नतेषांविद्यते भयं ॥२॥
भजे ॥१॥ श्रीरामजी आनंदतमीपुष्पप्रकाशं पीतवाससमच्युतम् येनमस्यंति गोविंदं

तारणाय चक्षुश्श्रोत्रनासासंभूत्यै एषपुरुषपिंडो मद्दत्तस्तवोपतिष्ठतां ३ तृतीयेदि
ने महारौरवनाम नरकोत्तारणाय भुजग्रीवचक्षुसंभूत्यै ४ चतुर्थदिने तामिश्रनाम
नरकोत्तारणाय उदरनाभिवास्थिलिंगगुदामेढ्रावयवसंभूत्यैः ५ पंचमे अंधता
मिश्रनाम नरकोत्तारणाय उदस्पृष्ठोरुजानुजंघाचरणावयवसंभूत्यै ६ षष्ठमदि
ने संभ्रमनाम नरकोत्तारणाय निखिलांगप्रत्यंगमर्म्मसंभूत्यैः ७ सप्तमेमध्यकीमि
नाम नरकोत्तारणाय सर्वगात्रसंभूत्यै ८ अष्टमे पुरीषभक्षणनाम नरकोत्तारणाय
नखरोमसंभूत्यै ९ नवमे स्वमांसभक्षणनाम नरकोत्तारणाय बलवीर्य्यमर्म्मास्सं
भूत्यै १० दशमे दिने कुंभीपाकनाम नरकोत्तारणाय क्षुत्पिपासानाशनाय एषपु
रुषपिंडो मद्दत्तस्तवोपतिष्ठतां ११ एवं क्रमेण प्रत्यह दशदिनपर्य्यंतानि पृथक्कृत्यं
शेषपूर्ववत् इतिदशदिनकृत्य तत्रादौ निर्णयवाक्यं विप्रः शुद्ध्यत्यपः स्पृष्ट्वा क्षत्रि
यो वाहनायुधं वैश्यः प्रत्योदरश्मीन्वाशुद्रायष्टीकृतशया ब्राह्मणो दशरात्रेण
द्वादश्याहेन क्षत्रिया वैश्य पंचदशाहेन शुद्रोमासेन शुद्ध्यति इत्याशौचनिर्णयवि
चार्य दशमदिने वस्त्राणि प्रक्षालनार्थं रजकगृहे गत्वा अवशिष्टवासांसि दश

मदिनेमस्नालयेत्त दशमदिने गृहलोपन पूर्वकं ताम्रभाजनोद्देशं शोध्य: मृन्मयभाडा
नितत्का: दीपं जलाशये निक्षिप्य दंडंच निक्षिप्य पिंडदानादिकृत्वा प्रथमदिनकर्ता
चलिंवेदिंच कुंभंच संभेद्य आकाशे पयोदानं अमुकप्रेताय इदंपय उपतिष्ठतां ततःवि
पाथेय श्राद्ध मोदनमेकं वटकं कृत्वा संकल्प अद्येहा ऽमुक गोत्रा ऽमुक प्रेताय पा
थेय श्राद्धे इदं वटकान्न सहिताय मोदनं तवोपतिष्ठतां इति मार्गमध्ये दत्वा: तता
उत्तरे जलाशये गत्वा सर्वो बांधवा यथादेशाचारं नखरोम छेदनाभ्यां पूर्वकामला
पकर्षणं स्नानं कृत्वा वासांसि परिधाय मंगलद्रव्याणि स्पृशेत दधिपूर्व गोरोचन
हरिद्रा रोमपाल्लवतामृत्तिकाशयपं चंदन ब्राह्मण पादगाव एतानि मंगलद्रव्याणि
स्पृष्ट्वा पंचगव्य प्राश्य गृहे बांधवैः सह भुंजित इति दशदिन कृत्वा अथैकादश
कृत्वा प्रथमं दंपत्ति पूज्या शेज्यादेया ततः परः पश्चाद्वृद्धे कादशाहिकं एवं क्रमे
णाविधि: प्रथमेण स्नात्वा अद्येहा ऽमुक गोत्रस्या ऽमुक प्रेतस्य प्रेतत्व विमुक्ति
ऽर्थं स्वर्गलोक प्राप्तये द्विज दंपत्यो पूजनं कर्तुमादौ स्नानं करिष्ये स्नात्वा दक्षि
णात्तरायत्ता शय्यां विस्तीर्य्य सामग्री संपाद्य शुभे पवित्रेणाके दंपति पूजनं कुर्य्या

९ अद्येह इत्यादि देशकालौ संकीर्त्य ऽमुकप्रेतगोत्रस्य ऽमुकप्रेतस्य प्रेतत्वविमुक्तये
ऽक्षयस्वर्गलोकप्राप्तिकामा द्विजदंपत्यौ पूजनं करिष्ये इति संकल्पः द्विजदंपतिभ्यां
नमः पाद्यं अर्घं गंधं अक्षतां पवित्राणि धूपं दीपं पूपकादिनैवेद्यं वस्त्रालंका
रणादिभिः संपूज्य द्विजदंपतिभ्यां नमः वस्त्रभूषणानि इति नाममंत्रेण संपूज्य वस्त्र
भूषणादिनि यथासंभवं दत्वा अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्त
येऽक्षयस्वर्गलोकप्राप्तिकामः द्विजदंपत्यौ पूजनकर्म्मणा एतानि पाद्यादि गंधाक्षत
धूप दीप नैवेद्य वासोभूषणानि युवाभ्यां संप्रदद्ये दक्षिणासंकल्पः अद्येहाऽमु
कगोत्रस्याऽमुकप्रेतस्य प्रेतत्वप्रतिविमुक्तये ऽक्षयस्वर्गलोकप्राप्तये द्विजदंपतिभ्यां
पूजनकर्म्मणः सांगतासिद्ध्यर्थं इमानि रजितदक्षिणां ब्राह्मणाय दास्ये तत्सत् त
तो लक्ष्मीनारायणप्रतिमां अग्न्युत्तारणपूर्वकं पंचगव्येनास्नापयित्वा प्रतिष्ठाप्य
शय्यापरि निधाय पूजासंकल्पः अद्येहाऽमुकगोत्रस्या अमुकप्रेतस्य नरका
दि सकलदुःखोद्धारण सकलभोगसमन्विता [illegible] स्वर्गलोकप्राप्तिकामा श्री
लक्ष्मीनारायणप्रतिमा युवाभ्यां पूजनं करिष्ये अथ लक्ष्मीनारायणध्यानम्

दक्षिणाूर्ध्वकरे पद्मं शंखं मूर्द्धाकरे न्यसेत् वामोर्ध्वे [illegible] चक्रं लक्ष्मीपृष्टे करे न्यसेत्
वामोत्संगगता लक्ष्मी रत्नपात्रकरा भवेत् पद्मासन [illegible]कुर्य्याद्ध्यायेद्देवं चतुर्भुजम्
दक्षिणास्तकरे व्यासं पृष्ठे देवस्य चक्रिणः इति ध्यात्वा नाममंत्रेण पूजनं कृत्वा ॐ लक्ष्मी
नारायण पाद्यं ऽर्घ्यं गंधं ऽक्षतां पुष्पाणि धूपं दीपं पूपकादि नैवेद्यं वस्त्र भूषणादि
भिस्संपूज्यः संकल्पः अद्येह ऽमुकगोत्र ऽमुकप्रेतस्य प्रेतत्वविमुक्तिकाक्षयस्वर्ग
लोकप्राप्तिकाम श्रीलक्ष्मीनारायणप्रतिमा एतानि पाद्यादिभिर्गंधाक्षतपुष्पधूप
दीपनैवेद्यवासोभरणादिभी पुजाभ्यां संप्रददे दक्षिणासंकल्पः अद्येहाऽमुकगोत्र
स्य अमुकप्रेतस्य प्रेतत्वविमुक्तिकामः ऽक्षय स्वर्गलोकप्राप्तिकाम श्रीलक्ष्मीनाराय
ण पूजाप्रतिष्ठासिद्ध्यर्थं एतानि रजतानि निष्क्रयीभूतं द्रव्यं ब्राह्मणाय तुभ्यं संप्रददे
ततो शय्यादान संकल्पः अद्येहाऽमुकगोत्रस्य ऽमुकप्रेतस्य प्रेतत्व विमुक्तिकामः इ
मानि पूर्वोक्त भोज्याशय्या पुफल वस्त्र समन्विताया ऽमुकशर्मणे ब्राह्मणाय तुभ्यम
हं संप्रददे अथ कांचनपुरुषपूजनं अद्येहाऽमुकगोत्रस्यामुकप्रेतस्य नरकादिदुःखनि
वारण पूर्वकाक्षय स्वर्गलोक प्राप्तकामनाय कांचनपुरुषस्य पूजनं करिष्यः कांचन

पुरुषायायनमः पाद्यं अर्घं गंधं अक्षतं पुष्पाणि धूपंदीपं धूपकादि नैवेद्यं वस्त्रभू
षणादिभिःसंपूज्य शय्यादानसंकल्प्य यथोक्तलक्षणवतींशय्यां दक्षिणोत्तरायतांपरि
स्तीर्य्य शिरःप्रदेशे घृतकुंभनिधाय चरणप्रदेशेज्वलंति चतुर्वर्तिकांनिधायपार्श्वे
याःदुग्धकुंभ जलकुंभौ स्थापयेत् लक्ष्मीनारायणप्रतिमांसर्वौषधीपंचामृतेन
स्नापयेत् शय्योपरिस्थापयेत् गंधाद्युपचारैःसंपूज्य रत्निमक अद्येहेत्यादिदे
शकालौ संकीर्त्य अमुकगोत्रस्य अमुकप्रेतस्य प्रेतत्वविमुक्तये सकलनरकादिदुः
खोद्धारणपूर्वकामलक्षय स्वर्गलोकप्राप्तिकामो यमयातनारहितसकलदुःखोद्धा
रणपूर्वकां इमां शय्यांदधिद्रा कुंभघृतकुंभ जलकुंभदीपकाछत्रचामराशयोपानत्कोपा
नाहवाहनायुध पात्र भोजनपात्रविविधभक्ष्यभोज्यादि फलपुष्पगंधानुलेपनोद्वर्तन
तांबूल धूपेपधान्यवितानक जलसिंहासनादितिलकार्य मादर्शसौवर्णरजत ताम्रादि
भाजन सुवर्णभूषणो डुवरी लोहद्राक्षा मादवसभाजन करपूरमृगमद श्रीखंड
कुंकमसलका अगरुप्रियंगुदधि शर्षपाक्षीरविक्षतानि नारिलं कलादिकौशेय

क्षौमाविककार्प्यासिक नानावस्त्रसौवर्णादि रजतभूषणादिनि यथाशक्त्युपकल्पि
तानि यथाकरणवती शय्यां प्रजापतिदैवत्यां लक्ष्मीनारायणप्रतिमासहितां गंधा
दिभिः सम्पूजितां अमुकगोत्रायाऽमुकवेदाध्यायिनेऽमुकशर्म्मणे ब्राह्मणाय तुभ्य
महं सम्प्रददे इत्युच्चार्य्य जलमुत्सृजेत् यथानक्षत्रशयनं शुन्यसागरजातय शय्यात
थापशुन्यास्तु यथाजन्मनिजन्मनि ततो दानप्रतिष्ठा अद्येहाऽमुकगोत्राऽमुकप्रेतस्य
शय्यादानप्रतिष्ठासिद्ध्यर्थं मिमां सुवर्णादिनिष्क्रयीभूतं द्रव्यं ब्राह्मणाय प्रदातुभ्यं महं
प्रददे अथ कपिलादानं यथोक्तलक्षणवतीं कपिलां गामानीय संकल्प· अद्येह
त्यादेशकालौ संकीर्त्याऽमुकगोत्रस्याऽमुकप्रेतस्य प्रेतत्वविमुक्तये अक्षयस्वर्गलोकप्रा
प्तिकामः कपिलादानमहं करिष्ये गोपादौ प्रक्षाल्य· गव्येनमः गंधाद्युपचारैः सम्पूज्य:
कपिले हरिभे सर्ववर्णानां पूजनीया सिरोहिणी तीर्थधेनुमयी यस्मात् ततः शांतिं प्रयच्छ मे
अनेन मंत्रेण सम्पूज्य गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश यस्मात्तस्मा छिभं वेश्यादि
हलोके परत्र च इत्यभ्यर्थयेत् ततः तिलकुशजवजलान्यादाय देशकालौ स्मृत्वा अद्येह

अमुकगोत्रस्य अमुकप्रेतस्य अक्षयस्वर्गलोकप्राप्तिकाम इमां कपिलां गां सवत्सां यथाश
क्ति अलंकृतां श्रीलक्ष्मीनारायणप्रीतये अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इ
तिमकुशाक्षततिलसुवर्णसहितं गोपुच्छविकरे दद्यात् ततो दाता दानप्रतिष्ठां कुर्यात्
अद्येहामुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिकामोऽक्षयस्वर्गलोककामः कपिलादानक
र्मणः प्रतिष्ठासिद्ध्यर्थं गोदानप्रतिष्ठां त्विमं सुवर्णमग्निदैवतं गोदानप्रतिग्राहिब्रा
ह्मणाय तुभ्यमहं संप्रददे अथोदकुंभदानम् एककुशब्राह्मणं कुंभोपरि संस्था
प्रतिष्ठाप्य गंधादिभिः संपूज्य कुंभोपरि सद्गुग्ध जलपूरयित्वा सद्व्यंकृत्वा धान्योप
रि स्थापयित्वा पार्श्वयोश्चतुर्दश्चिनित सपक्षोपरीतं मस्थाया सदीपपात्रं स्थापयित्वा
कुंभोपरि संकल्पः अद्येहेत्यादिदेशकालौ स्मृत्वा अमुकगोत्रस्य अमुकप्रेतस्य प्रे
तत्वविमुक्तये अक्षयस्वर्गलोकप्राप्तिकामः एतान्सप्ताधिकसत्तचयकुंभान्सदीपा
न्सवस्त्रु एवंविधप्रतिदिनस्य क्षुद्‌तृपिपासाधकारापशान्त्यर्थं ब्राह्मणाय दास्ये ततस्त
एकस्मै ब्राह्मणाय संवत्सरदिनगणितं यथाशक्त्या अन्नप्रयच्छन्ति यस्मि

आह्निकं संवत्सरं पर्यंतं तस्मिन्तिथौ संभोजयेत् यावदब्दं तु यो दद्यात् उदकुंभं विप्र
सर प्रेताय अन्नसमायुक्तं सोऽश्वमेधफलं लभेत् अथ वृषोत्सर्गविधि सर्वसामग्री
संपाद्य देशकालौ स्मृत्वाऽमुकगोत्रस्यामुकप्रेतस्य प्रेतत्वविमुक्तिकामनया स्वर्गलो
कप्राप्त्यै वृषोत्सर्गमहं करिष्ये अस्मिन्वृषोत्सर्गकर्मणि ब्रह्माचार्यवरणपूजनमहं
करिष्ये अस्मिन्वृषोत्सर्गकर्मणि कृताकृतावेक्षणाय त्वं ब्रह्मा भव तथाऽऽचार्यकर्मक
र्त्तुमाचार्यो भव ॐ परिसमुह्य परिलिप्योल्लिख्योद्धृत्याभ्युक्ष्येति पंचभूसंस्कारपूर्वकम
ग्निसंस्कारान्विधाय अग्नेः संस्थापनं ततो ब्रह्मासनं आत्मासनं प्रणीपात्रं उदकेना
न पूर्णं दर्भैराच्छादनं उत्तरेणनिधानं बर्हिषा प्रदक्षिणमग्निस्तरणं अर्थवत्या आच्छा
दनं पवित्रच्छेदनानि त्रीणि कुश तरुणानि द्वे पवित्रे प्रोक्षणीपात्रं आज्यस्थालिश्च
रुपाके चरुस्थालिं समार्जनकुशाः पंच उपयमनकुशाः त्रिप्रभृतयः समिधस्ति
स्रुवगव्यमाज्यं व्रीहितंडुलः पूर्णपात्रं पिष्टचरुसिद्ध पवित्रकरणं त्रिभिर्दर्भैर्द्वे छेदये
प्रोक्षणीपात्रे प्रणीतोदकमासिंच्य अर्थवत्प्रोक्ष्यः आज्यं प्रोक्ष्य स्रुवं प्रोक्ष्य

पराामासादित पात्रप्रोक्षणं असंचरप्रोक्षणीधानं आज्यस्थाल्यामाज्यं निर्वाप्य पायस
स्थाल्यादिक्षिसेचनं तंडुलप्रक्षेपः आज्याधिश्रयणं युगपदग्न्यारोपणं उपर्य्यग्नि
करणं सुभयो अद्धाश्रितं चरोः स्रुवप्रतपनं समार्जनकुशैः संमृज्य पुनःप्रतपनं दक्षि
तोनिधानं आज्योद्वासनं पश्चाच्चरूद्वासनं आज्योत्पवनं अवेक्षणमपद्रव्यनिरसनं
नं प्रोक्षण्युत्पवनं उपयमनकुशानादायतिष्ठत समीधादानं प्रोक्षण्युदकेन चुल्लु
कग्नृहीतेन पर्युक्षणं तंडुलप्रोक्षितोदकेनप्रोक्षणं पवित्रप्रोक्षणीनिधानं दक्षिण
रजान्वाच्युहोतिस्रुवेण ॐ इहरतिः स्वाहा इदमग्नये ॐ इहरमध्वंस्वाहा इदम
ग्नये ॐ इहधृतिः स्वाहा इदमग्नये ॐ उपसृज्यंधरुणंमात्रेधरुणोमातर्धयेन्स्वाहा
इदमग्नये ॐ रायस्पोषमस्मासुधिष्यरत्स्वाहा इदमग्नये ततोब्रह्मान्वारब्धो जुहो
ति ॐ प्रजापतयेस्वाहा इदंप्रजापतये ॐ इंद्रायस्वाहा इदमिंद्राय ॐ अग्नयेस्वा
हा इदमग्नये ॐ सोमायस्वाहा इदंसोमाय ॐ रुद्रायस्वाहा इदंरुद्राय ॐ शिवाय
स्वाहा इदंशिवाय ॐ सर्वायस्वाहा इदंसर्वाय ॐ पशुपतयेस्वाहा इदंपशुपतये ॐ

उग्रायस्वाहा ॐईदंउग्राय ॐभवायस्वाहा ईदंभवाये ॐमहादेवायस्वाहा ॐईदंम
हादेवाय ॐईशानायस्वाहा ईदईशानाय ततः चरोर्जुहोत्ति ॐपूषावा· अत्वेत
न पूषारक्तुगुप्तः पूषा वावाजान्समनोतुनः स्वाहा इदंपौस·ततः पायसंचरुंजुहो
ति ॐ अग्नयेस्विष्टकृतेस्वाहा इदंस्वीष्टकृते ततोभूराधान वाहुतयः ॐभूस्वाहा
इदंमग्नये ॐभुवस्वाहा इदंभुवाये ॐस्वः स्वाहा इदंसूर्य्याये ॐतन्नोऽग्नेस्वा
हा इदंमग्निवरुणाभ्या ॐसत्वन्नोऽग्ने: इदंमग्नये ॐ आयाश्चाग्ने· इदंमग्नये ॐ
येतेसतंवरुण ईदंमग्निवरुणायादित्येसवित्रे विश्वेदेवेभ्योमरुद्भ्यः स्वर्केभ्यः
ॐउदुत्तमंवरुणपास ईदंवरुणायादित्ये संस्त्रवप्राशन पवित्रप्रतिपत्ति प्रणीता वि
मोक ब्रह्मणे पूर्णपात्र वरयोरभ्यं तरस्यदानकृत्वा होतृब्रह्मणाभ्योदक्षिणांदत्वा
अथवत्सरीवृषभमादाया अपरन्नुरतः नमः सोतिरुद्रा ध्यानं रुद्रकृ वोजंभदु
ध्याइत्यंतंपठीत्वा ततोदक्षिणा पार्श्वेशूलेन वामपार्श्वे शूलेन वामपार्श्वेचक्रेण
वृषभमंकयित्वा श्रीसूक्तंपठित्वा अथश्रीसूक्त ॐहिरण्यवर्णाहरिणीसुवर्ण

रजतस्त्रजाँ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह: तांम्म आवहजातवेदो ल
क्ष्मीमनपगामिनिं यस्यां हिरण्यं विंदेय गामश्वं पुरुषानहं अश्वपूर्वां रथमध्यां ह
स्तिनादप्रमोदनी श्रीयं देवीमुपह्वये श्रीर्मा देवीर्जुषतां कांसोस्मितां हिरण्य प्राका
रामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं चंद्रां प्रभासांय
शसा ज्वलंतीं श्रियंदेवी लोके देवजुष्टामुदारां तांपद्मनेमिंशरणमहंप्रपद्ये अलक्ष्मी
मेनश्यतां त्वां वृणोमी आदित्यवर्णे तपसोधिजातो वनस्पति स्तव वृक्षोथ विल्व त
स्यफलानि तपसा नुदंतु मायां तरायश्च वाह्या अलक्ष्मी: उपैतु मां देवसखः कीर्तिश्च
मणिना सह प्रादुर्भूतो सुराष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे क्षुत्पिपासा मलां ज्येष्ठा म
लक्ष्मीं नाशयाम्यहं अभूतिमसमृद्धिंच सर्वांनिर्णुद मे गृहात् गंधद्वारां दुराध
र्षां नित्यपुष्टां करीषिणीं ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ओंमनस:काम
माकूतिं वाच: सत्यमशीमहि पशूनांरूपमन्नस्य मयि श्री: श्रयतां य
श: कर्दमेनप्रजाभूता मयिसंभवकर्दम श्रियंवासय मे कुले मातरं पद्ममालिनीम्

निजेदेविमातरंवश्रियंवासयमकुले आर्द्रांयुष्करिणींपुष्टिंसुवर्णांहेममालिनीम् सूर्यांहि
रण्मयींलक्ष्मींजातवेदममावह तांम आवहजातवेदो लक्ष्मीमनपगामिनीम् यस्यांहिर
ण्यंविंदेयंगामश्वंपुरुषानहं यःशुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहं श्रियःपंचदशर्चं
च श्रीकामःसततंजपेत् सरसिजनिलये सरोजहस्तेधवलतरांशुकगंधमाल्यशोभे हरि
वल्लभेविभूतिदेअसीदमह्यं श्रीवर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते धान्यंधनंप
शुं पुत्रलाभं शतसंवत्सरं दीर्घमायुः इतिश्रीसूक्तं ऋग्वेदोक्तः हिरण्यवर्णाःशुचयःपा
वकायासुजातः काश्यपोयास्विंद्रायां अग्निंगर्भंदधिरेविरूपास्ता आपःस्योनासु
हवाभवंतु ॐयासांराजावरुणोयातिमध्ये सत्यानृते अवपश्यंजनानां मधुश्चुतःशु
चयोयाःपावकास्ता आपःस्योनासुहवाभवंतु ॐयासांदेवाविदिकृण्वंतिभक्ष्यं यांतरिक्षे
बहुधाभवंति याःपृथ्वींपयसोंदंतिशुक्रास्ता आपःसगुं स्योनासुहवाभवंतु ॐशिवेनमा
चक्षुषापश्यतापःशिवयातन्वोपस्पृशत त्वचंमे सर्वाँअग्नीँरप्सुषदोहुवे वोमयिवर्चोबलमोजोनिधत्त
केचित्तुश्रीसूक्तंपठंतियथोक्तं आपोहिष्ठेतितिसृभिःशन्नोदेवीतिमंत्रेण वत्सतरीसंस्या राम

प लोहघंटा नूपुरक नकदृ सिंदूरकज्जल मृदा सर्वासो भिश्चालक्तत्य संपूज्य सार्थ
येत् कामधेनुकुले जाता स्त्रियायन्त्य स्वधा सदा नरका दुद्धरत्वेन स्वर्ग लोकं मयार्चिता
इति सार्घ्य वृषभं पूजत् धर्मत्त्वं वृषभ रूपेण जगदानंद कारकः अष्टमूर्त्तेरधिष्ठान मतया
हि सतन्नमः इति वृषभं संपूज्य वृषभस्य दक्षिणे कर्णे जपेत् वृषाहि भगवान्धर्म्मश्चतुष्पद
गकिर्त्तित वृणोमि त महं भक्त्या समां रक्षतु सर्वदाः इति जपत्वा सकल्प· अद्येहाऽमुक
गोत्रस्या मुक प्रेतस्या प्रेतत्व विमुक्ति पूर्व का क्षय स्वर्ग लोक प्राप्तये प्रेतानि वत्सतरी युतं ये
नं वृषमुत्सृजेत् कारसं पुटं कृत्वा मंत्रपाठ पठेत् ॐ येनं युवानं पतिं वो ददामितेन क्रीडंतिश्च
रथ प्रियेण सानः साप्तजनुषा सुभगा यस्यायेणसामिधा मंदम हे वत्सतर्य्या वृषमपि नमवा
प्रयोक्तव्याः किंतु त्यक्ताः सत्यो वनेश्चनेनप्रयेण सह सर्वाछंदं चरतश्चमत्तः तृणा नियादतः इ
ति पठित्वा वत्सरीमध्यस्थं वृषभमभिमंत्रयेत् ॐ यमो भूरभि मावाहयिस्वाहा मरुतासिमा
रुत्ता गणाः सं मुर्मयो भूरभि मावहिस्वाहा वंस्पूर सिंदु वह्योंक्षव मयो भूरभि मावाहि स्वाहा
यास्ते अग्ने सूर्य्यस्य रुचोदि मानो ज्योतिरस्मिभिः ताभिन्नो अद्य सर्वाभिरुचेजनाय न
स्कधियादेवाः सूर्य्योरुचो गोष्वश्वेषु च पारुचंद्रे ध्याग्नि नाभिसर्वाभिरुचन्नो धेहि आत्स

गोषु रुचथ्ठुं राजसु नस्कृधि रुचं विश्वेषु शुद्रेषु महि धेहि रुचा रुचं ॐ तत्त्वा यामि ब्रह्मणा वं
द्यमान स्तदाशास्ते यजमानो हविर्भिव अहेडमानो वरुणे ह बोध्युरुशथ्ठुं समानऽआयु
प्रमोषि ॐ स्वर्ण घर्मे स्वाहा स्वर्णार्का स्वाहा स्वर्णः शुक्रः स्वाहा ॐ स्वर्ण ज्योतिं स्वाहा
ॐ स्वर्ण सूर्य्य स्वाहा इति मंत्रानुवाकेन वृषभमभिमंत्र्य : वृषभवत्सनारिणा पुच्छं न्वादा
यदक्षिणा मुखोऽपसव्येन पितृतीर्थेन तिलकुशजलेनोत्तर्पयेत् स्वधा पितृभ्यो वंधुभ्यश्च
पितृभ्ये मातृपक्षाश्च ये केचिद्ये चान्ये पित्रया : गुरुश्वशुरवधूनां ये कुलेषु समुद्भवा ये
प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिता : वृषोत्सर्गेण ते सर्वे लभन्तां तृप्तिमुत्तमां दद्यादनेनम
न्त्रेण तिलाक्षतयुतं जलं इति तर्पयित्वा ततो लोहकांश्य वरं दत्वा इति दक्षिणा संकल्पः
अद्येहामुक गोत्रस्यामुक प्रेतस्य प्रेतत्वविमुक्तिकामये वृषोत्सर्गकर्मणः साङ्गुण्यार्थं इमां
दक्षिणां ब्राह्मणाय दास्ये तत्सत् इति दत्वा विसर्जयेत् अथ वृषभलक्षणं यस्य भागयुते
शृंगे स्वाभिमुखे च सर्वदा सर्वेषामेव वर्णानां स च सर्वार्थ साधिकः वर्ज्यानाह कृष्णतालु
र्दशनो रुक्षरुक्ष्मस्य पार्श्वयो अशक्तो दत्तहस्त्यापि जिरिवदश्व स्मयान्वित ध्वांक्षाष्टांगस रामः॥

माभासा स्तथा मुरवकसन्निभा कुब्जकाराश्च खञ्जाश्च केकरासास्तथैव च   अंत्यं तंमु
ल्कपादाश्चाभाद्रा तन यना स्तथा नैतेवृष्या अयोक्तव्या गृहधार्य्यकथंचन वृषस्तु हायनः
वृषो वत्सतर्य्यो पिद्विहायन्त्यो गृह्या चतस्रो वत्सतर्य्यास्तु देवासभवतापि चेति एतस्य फ
लमाह एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजे
त् पतिपुत्रवती नारी भर्तुरग्रे मृता यदि वृषोत्सर्गं न कुर्वीत गां च दद्यात्पयस्विनी मिति
वचनात् पतिपुत्रवतीस्त्रीणां वृषोत्सर्गनिषेधः प्राप्तस्तदपवादमाह: एकादशाहि प्रे
तस्य पश्यंते नोत्सृज्यते वृषः प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि इति वचनाद्वश्यमेव
कार्य्यः इति वृषोत्सर्गविधि   अथैकादशाहावा श्राद्धविधि पाकविधाय स्नात्वा स
कल्प: अद्येहाऽमुकगोत्रस्यामुकप्रेतस्या एकादशाकर्त्तव्याय यथाधिकृत्यार्थं स्ना
नं करिष्ये इति संकल्प प्रातिविनावति स्नात्वा श्राद्धदेशमागत्वा आचम्य ब्राह्मणानि
मंत्रयेत गतोसि दिव्यलोके त्वं कृतान्तविहितान्यथा मनसा वायुभूतेन कृतान्तं विह
तोन्यथा विप्रत्वाहं नियोजयेत पूजयिष्यामि भोजनं सर्वविप्र निमंत्रयेत इति मंत्र

श्रे॰सं॰
१५

तैलाभ्यंगंकृत्वाउदङ्मुखोभूत्वा आपसव्यं अद्येहऽमुकगोत्रेऽमुकप्रेतत्वं २ तत्पाद्यंमद
त्तंस्तवोपतिष्ठतां इतिपाद्यं अमुकगोत्रऽमुकप्रेतस्य: स्वपादार्घो मद्दत्तं तवोपतिष्ठतां २
इतिपादार्घंदत्वा अद्येहाऽमुकगोत्रस्याऽमुकप्रेतस्य विमुक्तस्यऽक्षयस्वर्गलोकप्राप्त्यर्थं
एकादशाहश्राद्धमर्घपिंडसहितमेकोद्दिष्टविधानेनाहंकरिष्ये इतिसंकल्प: आसनं
अद्येहऽमुकगोत्रस्यामुकप्रेतस्य एतत्ते आसनं तवोपतिष्ठतां इत्यासनंदत्वा अर्घंसपा
ध अद्येहाऽमुकगोत्राऽमुक एषहस्तार्घो मदत्तं तवोपतिष्ठतां इत्यर्घंदत्वा अयंतेगंध
उपतिष्ठतां इत्यक्षत ईमानि भृंगराजपत्राणि तवोपतिष्ठतां अद्येहऽमुकगोत्रेऽमुकप्रे
तत्व ईमानिगंधाक्षतपुष्पाणि धूपदीपौ यज्ञसूत्रवासोभूषणादीनि मद्दत्तानि तवोप
भाजन पात्र शाकादि
तिष्ठतां इत्युच्चार्य विप्रहस्ते जलंदद्यात् ततःपाकमादाय भोजनपात्रे अन्नं सघृतं सो
पस्कारं संस्थाप्य: कुशतिलयवजलान्यादाय ऽमुकगोत्रऽमुकप्रेत इदमन्नं सोपस्कारं
यत्परिविष्टं तत्सर्वं तवोपतिष्ठतां ध्वांमित्यन्नं दत्वा विप्रकरे सकृदन्नं दत्वा भुंजध्वमित्युह २
दत्वा ततःतत्संस्थाना पुनरागत्य क्षीरघृतमधुमिश्रितमन्नमादाय विल्वमात्र रामः॥

उध धीनहत तिलै. शमीपत्रप्रमाणेन पींड ६

मधवाज्यतिलदुग्धमिश्रितान्नपीडं मधुरेनिधाय कर्म्मपात्र पूर्ववत्स्थापनं पूर्ववत् कर्म्मं गधाद्युप
चारै १

सुवृत्तं पिंडं कृत्वा वितस्त्रिमात्रं गोमयोदकेन कृतमंडले विधाय :" अद्येह अमुकगोत्रस्या ऽ
मुकप्रेताय तस्य वृत्तपिंडासनं तवो पतिष्ठतां मिति अद्येहा अमुकगोत्रा ऽमुकप्रेत अवने
